# .. parashurAmAShTAvi.nshatinAmastotram ..

# ॥ પરશુરામાષ્ટાવિંશતિનામસ્તોત્રમ્ ॥

## Document Information

Text title : parashurAmAShTAvi.nshatinAmastotram

File name : parashuraama28.itx

Location : doc_vishhnu

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : January 10, 2005

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ પરશુરામાષ્ટાવિંશતિનામસ્તોત્રમ્ ॥

શ્રી ગણેશાય નમઃ ।
ઋષિરુવાચ ।
યમાહુર્વાસુદેવાંશં હૈહયાનાં કુલાન્તકમ્ ।
ત્રિઃસપ્તકૃત્વો ય ઇમાં ચક્રે નિઃક્ષત્રિયાં મહીમ્ ॥ ૧॥

દુષ્ટં ક્ષત્રં ભુવો ભારમબ્રહ્મણ્યમનીનશત્ ।
તસ્ય નામાનિ પુણ્યાનિ વચ્મિ તે પુરુષર્ષભ ॥ ૨॥

ભૂભારહરણાર્થાય માયામાનુષવિગ્રહઃ ।
જનાર્દનાંશસમ્ભૂતઃ સ્થિત્યુત્પત્ત્યપ્યયેશ્વરઃ ॥ ૩ ॥

ભાર્ગવો જામદગ્ન્યશ્ચ પિત્રાજ્ઞાપરિપાલકઃ ।
માતૃપ્રાણપ્રદો ધીમાન્ ક્ષત્રિયાન્તકરઃ પ્રભુઃ ॥ ૪॥

રામઃ પરશુહસ્તશ્ચ કાર્તવીર્યમદાપહઃ ।
રેણુકાદુઃખશોકઘ્નો વિશોકઃ શોકનાશનઃ ॥ ૫॥

નવીનનીરદશ્યામો રક્તોત્પલવિલોચનઃ ।
ઘોરો દણ્ડધરો ધીરો બ્રહ્મણ્યો બ્રાહ્મણપ્રિયઃ ॥ ૬॥

તપોધનો મહેન્દ્રાદૌ ન્યસ્તદણ્ડઃ પ્રશાન્તધીઃ ।
ઉપગીયમાનચરિતઃ સિદ્ધગન્ધર્વચારણૈઃ ॥ ૭॥

જન્મમૃત્યુજરાવ્યાધિદુઃખશોકભયાતિગઃ ।
ઇત્યષ્ટાવિંશતિર્નામ્નામુક્તા સ્તોત્રાત્મિકા શુભા ॥ ૮॥

અનયા પ્રીયતાં દેવો જામદગ્ન્યો મહેશ્વરઃ ।
નેદં સ્તોત્રમશાન્તાય નાદાન્તાયાતપસ્વિને ॥ ૯॥

નાવેદવિદુષે વાચ્યમશિષ્યાય ખલાય ચ ।
નાસૂયકાયાનૃજવે ન ચાનિર્દિષ્ટકારિણે ॥ ૧૦॥

ઇદં પ્રિયાય પુત્રાય શિષ્યાયાનુગતાય ચ ।
રહસ્યધર્મો વક્તવ્યો નાન્યસ્મૈ તુ કદાચન ॥ ૧૧॥

॥ ઇતિ પરશુરામાષ્ટાવિંશતિનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

.. parashurAmAShTAvi.nshatinAmastotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*